vyomam
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

कोशदर्शनम् - ०७

Kalpadruma

A SANSKRIT – SANSKRIT DICTIONARY

शब्दकल्पद्रुमः अर्थात्

- एतद्देशस्थसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृतिनाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः ।
- स्यार-राजा-राधाकान्तदेव-बाहादुरेण् विरचितः **(1828 – 1858)**
- पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-सुप्रशस्तपरिशिष्टेन च सार्द्धम् ।

शब्दकल्पद्रुमः – ग्रन्थस्य नामकारणं

- एतत्कोषस्य शब्दकल्पद्रुम-नामकरण-कारणमेतत् । **स्वर्गीय-कल्पद्रुम-सन्निधाने यो यत् प्रार्थयते तस्य तत्प्राप्ति-र्भवत्येव** । मत्कृतमर्त्त्यीय-**शब्दकल्पद्रुम-समीपे यानि यानि समीहित-शब्दादीनि प्रार्थयन्ते तानि तान्यवश्यं प्राप्नुवन्ति** । अतः कल्पवृक्ष-सादृश्यमेव नामकारणं । प्राचीनसंग्रहकृद्भिरपि स्वकृतग्रन्थानां कल्पद्रुम-कल्पतरु-कल्पलता-प्रभृति नामधेयं कृतं । तत्सदृशार्थक-कामधेनु-चिन्तामण्यादि-पुस्तकानि च प्रचलन्ति एतद्ग्रन्थस्यवृक्षरूपकत्वात् अस्य स्वण्डस्य काण्डेति संज्ञां कृतवान् ॥

ग्रन्थपरिपाटी

अतः परमहमेतत्कोषस्यानुक्रमं विशेषनियमञ्च विवृणोमि । निखिलाभिधानिक-शास्त्रिक-लौकिक-व्यवहारिक-साधुशब्दानां धातुगणानाञ्च झटिति प्राप्तये तेषामानुपूर्व्विकाकारादि-क्षकारान्त-पञ्चाशद्वर्णानां यथाक्रमं सूचीं कृत्वा विन्यासमकुर्व्वं । तत्र **प्रथमं स्वरवर्णादिशब्दानां परे हलवर्णादि-शब्दानां शेषे युक्ताक्षरादि-शब्दानाञ्च वर्णक्रमेणैव यथास्थानं प्रथमा-विभक्त्यन्तत्वेन संस्थापनमकार्य्यं** । पदसाधने येषामन्त्याक्षराणां विकारो लोपो वा अभवत् ते वर्णास्तत्तच्छब्दोपरि विन्यस्ताः । अनुस्वार-विसर्गाणां षोडश-स्वरान्तर्गतत्वेन तदुभयवदाद्य-वर्णयुक्त-शब्दान् स्वरवर्णस्थलाभिषिक्तान् चकार । तत्पश्चात् प्रत्येक-शब्दस्य लिङ्गं प्रत्येक-धातोरनुबन्धञ्च निर्णीतवान् । येषां धातूनामनुबन्धो नास्ति तत्स्थानं बिन्दुयुक्तमथवा शुन्यमास्ते । तदनन्तरं सकल-शब्दानामर्थवाचक-पदानि प्रथभाविभक्त्यन्तत्वेन एवं समस्त-धात्वर्थवाचक-पदानि **सप्तमीविभक्त्यन्तत्वेन** लिखितानि । प्रत्येक-प्रसिद्ध-शब्दोत्तरं तदीयपर्य्यायाः देशभाषाश्च तथा प्रत्येक-धात्वर्थानन्तरं तट्टीका धातुदीपिकोक्तव्याख्यापदादीनि विहितानि सर्व्वशेषे तेषां प्रमाणानि तदभावे तत्प्रयोगाः तद्विरहे तद्व्युत्पत्ति-र्लिखिता ॥

वबयोर्भेदः (ओष्ठ्य-दन्त्यवकारौ)

वर्णमालायां च वर्ग्य-जकारान्तःस्थयकारौ मूर्द्धन्य-णकार-दन्त्यनकारौ वर्ग्यवकारान्तःस्थवकारौ तालव्यशकार-मूर्द्धन्यषकारदन्त्यसकाराः सन्ति ।

एतदखिल-वर्णादि-शब्दानां धातूनाञ्च प्रभेदं कृत्वा सूचीपूर्व्वकं यथास्थानं संस्थापनं कृतवान् । **वङ्गदेशे उक्तवर्णानामुच्चारण-भेदाभावः । विशेषतो वकारद्वयस्याकारोच्चारणयोर्भेदो नास्ति पश्चिमादिदेशे वर्त्तते** । किन्तु मुग्धबोधटीकायां दुर्गादासविद्यावागीशधृता वकार-भेदिकैकप्राचीनकारिकास्ति ।

सा यथा, --

“उदूटौ यत्र विद्येते यो वः प्रत्ययसन्धिजः । अन्तःस्थं तं विजानीयात्तदन्यो वर्ग्य उच्यते” ॥

एतत्कारिकया सकलवकार-प्रभेदो न भवति । इति हेतोरहं धातूनां **शब्दाकरत्वादोष्ठ्यदन्त्य-वकारादिधातुद्वारा पदसाधनं कृत्वा** बहु-प्रयत्नै-र्वकारद्वय-भेदं प्रकाशितवान् रेफयुक्तवर्णन्तु रवर्णात् परं शब्द-सूचीमध्ये विन्यस्तवान् ॥

अन्वेषणाय...

- **शब्दाः** – प्रथमा एकवचनरूपमुपयुज्य अन्वेष्टव्यम्
  - प्रसिद्धपर्यायपदानि
  - विशिष्टपर्यायपदानि
- **पुं** (पुंलिङ्गः), **स्त्री** (स्त्रीलिङ्गः), **क्ली** (क्लीबलिङ्गः), **त्रि** (वाच्यलिङ्गः/त्रिलिङ्गः) **व्य** (अव्ययः)
- यस्मिन् स्थले पङ्क्तिद्वये पतितास्यात् प्रथमपङ्क्तिशेषे समरेखाचिह्नम् (-)
- विशिष्टवृत्तान्तसमापनात् परं, विशेषशब्दार्थारभात् पूर्वं च पुष्पाकारचिह्नम् (*)
- बहुत्र द्वित्वम्* (उदा - कर्म्म, पूर्व्व); वकार-बकारयोरभेदः (उदा - वृहत्, पूर्ब्ब)

(*8-4-46 अचो रहाभ्यां द्वे)

शार्ङ्गी

शार्ङ्गी[1], [न्] पुं, (शार्ङ्गमस्यास्तीति । शार्ङ्ग + इनिः ।)[2] विष्णुः । इत्यमरः ॥[3](यथा, रघुः । १२ । ७० ।

[4]"स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥")

धन्विमात्रम् । इति शार्ङ्गशब्दार्थदर्शनात् ॥

[1] प्रथमाविभक्तिः

[2] व्युत्पत्तिः

[3] पर्यायपदम् (सप्रमाणम्)

[4] प्रमाणम्

vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study. Replication/reuse in any form without written permission from the organisation is prohibited.